http://www.onlineBU.com

# AF-2529

M.A. (Previous)
Term End Examination, 2017-18

## SANSKRIT

Paper - V

काव्य

*Time* : Three Hours] [*Maximum Marks* : 100
[*Minimum Pass Marks* : 36

**नोट** : **सर्वे** प्रश्नाः समाधेयाः।

**इकाई-I**

**1.** (क) अधोलिखितेषु पद्येषु कयोश्चिद् **द्वयोः** ससन्दर्भ व्याख्या कार्या : 15

(*i*) धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः

सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।

इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे

कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥

http://www.onlineBU.com



(*ii*) तस्यास्तिक्तैर्वनगजमदैर्वासिंत वान्तवृष्टि

जर्म्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छे:।

अन्त:सारं घन! तुलयितुं नानिल: शक्ष्यति त्वां

रिक्त:सर्वो भवति हि लघु: पूर्णता गौरवाय॥

(*iii*) अप्यन्यस्मिञ्जलधर! महाकालमासाद्य काले

स्थातव्यं ते नयनविषयं यावदत्येति भानु:।

कुर्वन् संध्याबलिपटहतां शूलिन: श्लाघनीया-

मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम्॥

(*iv*) हित्वा तस्मिन् भुजगवलयं शम्भुना दत्तहस्ता

क्रीडाशैले यदि च विहरेत् पदचारेण गौरी।

भङ्गीभक्त्या विरचितवपु: स्तभितान्तर्जलौघ:

सोपानतवं कुरु मणितटारोहणायाग्रयायी॥

http://www.onlineBU.com



(ख) गीतिकाव्यदृष्ट्या मेघदूतस्य वैशिष्ट्यं प्रतिपाद्यताम्। 10

*अथवा*

पूर्वमेघमाश्रित्य महाकवेः कालिदासस्य प्रकृति वर्णन नैपुण्यं निरूप्यताम्।

**इकाई-II**

**2.** (क) अधोलिखितेषु कावपि **द्वौ** सप्रसङ्गं व्याख्येयौ : 20

(*i*) सुखं हि दुःखान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनम्।
सुखात्तु यो याति नरो दरिद्रतां
धृतः शरीरेण मृतःस जीवति॥

(*ii*) दारिद्रयात् पुरुषस्य बान्धवजनो वाक्ये न सन्तिष्टते
सुस्निग्धा विमुखीभवन्ति सुहृदः स्फारीभवन्त्या पदः।
सत्त्वं ह्रासमुपैति शीलशशिनः कान्तिः परिम्लायते
पापं कर्म च यत् परैरपि कृतं तत्तस्य संभाव्यते॥

http://www.onlineBU.com



(*iii*) तं तस्य स्वर संक्रमं मृदुगिरं श्लिष्टञ्च तन्त्रीस्वनं

वर्णानामपि मूर्च्छनान्तरगतं तारं विरामे मृदुम्।

हेलासंयमितं पुनश्च ललितं रागाद् द्विरुच्चारितं

यत्सत्यं विरतेऽपि गीतसमये गच्छमि शृण्वन्निव॥

(*iv*) अंसेन बिभ्रत् करवीरमालां स्कन्धेन शूलं हृदयेन शोकम्।

आघातमद्याहमनुप्रयामि शामित्रमाल-ब्धुमिवाध्वरेऽजः॥

(ख) 'मृच्छकटिकम्' प्रकरणस्य वैशिष्ट्यं समालोचनीयम्। 10

***अथवा***

वसन्तसेनायाः चरित्रचित्रणं क्रियताम्।

**इकाई-III**

**3.** कयोश्चिद् **द्वयोः** पद्ययोः सप्रसङ्गं व्याख्या कार्या : 20

(क) यदस्य यात्रासु बलोद्धतं रजः

स्फुरत्प्रतापानलधूममञ्जिम।

http://www.onlineBU.com



तदेव गत्वा पतितं सुधाम्बुधौ
दधाति पङ्कीभवदङ्कतां विधौ॥

(ख) सरोरुहं तस्य दृशैव निर्जितं
जिता: स्मितेनैव विधोरपिश्रिय:।
कुत: परं भव्यमहो महीयसी
तदाननस्योपमितौ दरिद्रता॥

(ग) पतत्त्रिणा तद्रुचिरेण वञ्चितं
श्रिय: प्रयान्त्या: प्रविहाय पल्वलम्
चलत्पदाम्भोरुहनूपुरोपमा
चुकूज कूले कलहंसमण्डली॥

(घ) धिगस्तु तृष्णातरलं भवन्मन:
समीक्ष्य पक्षान्मम हेमजन्मन:।
तवार्णवस्येव तुषारसीकरै
र्भवेदमीभि: कमलोदय: कियान्॥

**इकाई-IV**

**4.** अधस्तनेषु कावपि **द्वौ** सप्रसंङ्ग व्याख्यायताम् : 15

(क) देवि त्वन्मुखपङ्कजेन शशिन: शोभातिरस्कारिणा
पश्याब्जानि विनिर्जितानि सहसा गच्छन्ति विच्छायताम्।

http://www.onlineBU.com



श्रुत्वा त्वत्परिवारवारवनितागीतानि भृङ्गाङ्गना
लीयन्ते मुकुलान्तरेषु शनकैः संजातलज्जा इव॥

(ख) यातोऽस्मि पद्मनयने समयोममैष
सुप्ता मयैव भवती प्रतिबोधनीया।
प्रत्यायनामयमितीव सरोरुहिण्याः
सूर्योऽस्तमस्तकनिविष्टकरः करोति॥

(ग) दृशः पृथुतरीकृता जितनिजाब्जपत्रत्विष-
श्चतुर्भिरपि साधु साध्विति मुखैः समं व्याहृतम्।
शिरांसि चलितानि विस्मयवशाद् ध्रुवं वेधसा
विधाय ललनां जगत्त्रयललामभूतामिमाम्॥

(घ) हर्म्याणां हेमशृङ्गश्रियमिव निचयैरर्चिषमादधानः
सान्द्रोद्यानद्रुमाग्रग्लपनपिशुनितात्यन्ततीवाभितापः।
कुर्वन् क्रीडामहीध्रं सजलजलधरश्यामलं धूमपातै-
रेष प्लोषार्तयोषिज्जन इव सहसैवोत्थितोऽन्तः पुरेऽग्निः॥

http://www.onlineBU.com



**इकाई-V**

**5.** 'नैषधे पदलालित्यम्' उक्तिरियं सनिदर्शनं समीक्ष्यताम्। 10

*अथवा*

रत्नावलीनाटिकाया वैशिष्ट्यं निरूप्यताम्।